# ॥ लघुन्यासः ॥

# LAGUNYASAM

ओं अथात्मानं शिवात्मानं श्री रुद्र रूपं ध्यायेत् ॥

शुद्ध स्फटिक संकाशं त्रिनेत्रं पञ्च वक्त्रकम् ।

गङ्गाधरं दश-भुजं सर्वाभरण भूषितम् ॥

नीलग्रीवं शशाङ्काङ्कं नाग यज्ञोप वीतिनम् ।

व्याघ्र चर्मो-त्तरीयं च वरेण्य मभय प्रदम् ॥

कमण्डल्वक्ष सूत्रेच दधानं शूल पाणिनम् ।

ज्वलन्तं पिङ्गल जटां शिखा मद्योद धारिणम् ॥

वृष-स्कन्ध समारूढं उमा देहार्ध धारिणम् ।
अमृतेनाप्लुतं हृष्ठं दिव्य-भोग समन्वितम् ॥
दिग्देवता समायुक्तं सुरा-सुर नमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुव-मक्षर मव्ययम् ॥
सर्व व्यापिन मीशनं रुद्रं वै विश्व-रूपिणम् ॥
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥

प्रजनने ब्रह्मा तिष्ठतु । पादयो र्विष्णु स्तिष्ठतु ।

हस्तयो र्हर स्तिष्ठतु ।बाह्वो रिंद्र स्तिष्ठतु ।

जठरे अग्नि स्तिष्ठतु । हृदये शिव स्तिष्ठतु ।

कंठे वसव स्तिष्ठंतु । वक्त्रे सरस्वती तिष्ठतु ।

नासिकयो र्वायु स्तिष्ठतु । नयनयो श्चंद्रादित्यौ तिष्ठेताम् ।

कर्णयो रश्विनौ तिष्ठेताम् । ललाटे रुद्रा स्तिष्ठंतु ।

मूर्ध्न्या-दित्या स्तिष्ठंतु । शिरसि महादेव स्तिष्ठतु ।
शिखायां वामदेव स्तिष्ठतु । पृष्ठे पिनाकी तिष्ठतु ।
पुरतः शूली तिष्ठतु । पार्श्वयोः शिवाशंकरौ तिष्ठेताम् ।
सर्वतो वायु स्तिष्ठतु ।
ततो बहिः सर्वतोऽग्नि ज्वाला-माला परि-वृत स्तिष्ठतु ।
सर्वे ष्वंगे-षु सर्वा देवता यथा स्थानं तिष्ठंतु ।
माम् रक्षंतु ।

अग्निर्मे वाचि श्रितः । वाग्घृदये । हृदयं मयि ।
अहममृते । अमृतं ब्रह्मणि ।
वायुर्मे प्राणे श्रितः । प्राणो हृदये । हृदयं मयि ।
अहममृते । अमृतं ब्रह्मणि ।
सूर्यो मे चक्षुषि श्रितः । चक्षुर् हृदये । हृदयं मयि ।
अहममृते । अमृतं ब्रह्मणि ।
चन्द्रमा मे मनसि श्रितः । मनो हृदये । हृदयं मयि ।
अहममृते । अमृतं ब्रह्मणि ।

दिशो मे श्रोत्रे श्रिताः। श्रोत्रꣳ हृदये। हृदयं मयि।

अहममृते। अमृतं ब्रह्मणि।

आपो मे रेत-सि श्रिताः। रेतो हृदये। हृदयं मयि।

अहममृते। अमृतं ब्रह्मणि।

पृथिवी मे शरीरे श्रिता। शरीरꣳ हृदये। हृदयं मयि।

अहममृते। अमृतं ब्रह्मणि।

ओषधि वनस्पतयो मे लोम-सु श्रिताः। लोमानि हृदये।

हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

इन्द्रो मे बले श्रितः । बलꣳ हृदये । हृदयं मयि ।

अहममृते । अमृतं ब्रह्मणि ।

पर्जन्यो मे मूर्ध्नि श्रितः । मूर्धा हृदये । हृदयं मयि ।

अहममृते । अमृतं ब्रह्मणि ।

ईशानो मे मन्यौ श्रितः । मन्युर् हृदये । हृदयं मयि ।

अहममृते । अमृतं ब्रह्मणि ।

आत्मा म आत्मनि श्रितः । आत्मा हृदये । हृदयं मयि ।

अहममृते । अमृतं ब्रह्मणि ।

पुनर्मं आत्मा पुनरायु-रागात् ।

पुनः प्राणः पुनराकूत-मागात् ।

वैश्वानरो रश्मि-भि-र्वा वृधानः ।

अन्त-स्तिष्ठ त्व-मृतस्य गोपाः ॥